श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे

# ॥ अष्टाशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टाशीतितमः सर्गः ॥

## श्रीरामस्य कुशशय्यां दृष्ट्वा भरतस्य शोकपूर्ण उद्गारस्तेन स्वयमपि वल्कलजटाधारणपूर्वकं वने निवासाय विचारस्य प्रकटनम्

तच्छ्रुत्वा निपुणं सर्वं भरतः सह मन्त्रिभिः।
इङ्गुदीमूलमागम्य रामशय्यामवैक्षत ॥ **2.88.1** ॥

अब्रवीजननीः सर्वा इह तस्य महात्मनः।
शर्वरी शयिता भूमाविदमस्य विमर्दितम् ॥ **2.88.2** ॥

महाराजकुलीनेन महाभागेन धीमता।
जातो दशरथेनोर्व्यां न रामः स्वप्तुमर्हति ॥ **2.88.3** ॥

अजिनोत्तरसंस्तीर्णे वरास्तरणसञ्चये।
शयित्वा पुरुषव्याघ्रः कथं शेते महीतले ॥ **2.88.4** ॥

प्रासादाग्रविमानेषु वलभीषु च सर्वदा।
हैमराजतभौमेषु वरास्तरणशालिषु ॥ **2.88.5** ॥

पुष्पसञ्चयचित्रेषु चन्दनागुरुगन्धिषु।
पाण्डुराभ्रप्रकाशेषु शुकसङ्घरुतेषु च ॥ **2.88.6** ॥

प्रासादवरवर्येषु शीतवत्सु सुगन्धिषु।
उषित्वा मेरुकल्पेषु कृतकाञ्चनभित्तिषु ॥ **2.88.7** ॥

गीतवादित्रनिर्घोषैर्वराभरणनिःस्वनैः।
मृदङ्गवरशब्दैश्च सततं प्रतिबोधितः॥ **2.88.8** ॥

बन्दिभिर्वन्दितः काले बहुभिः सूतमागधैः।
गाथाभिरनुरूपाभिः स्तुतिभिश्च परन्तपः॥ **2.88.9** ॥

अश्रद्धेयमिदं लोके न सत्यं प्रतिभाति मा।
मुह्यते खलु मे भावः स्वप्नोऽयमिति मे मतिः॥ **2.88.10** ॥

न नूनं दैवतं किञ्चित् कालेन बलवत्तरम्।
यत्र दाशरथी रामो भूमावेवमशेत सः॥ **2.88.11** ॥

यस्मिन् विदेहराजस्य सुता च प्रियदर्शना।
दयिता शयिता भूमौ स्नुषा दशरथस्य च॥ **2.88.12** ॥

इयं शय्या मम भ्रातुरिदमावर्तितं शुभम्।
स्थण्डिले कठिने सर्वं गात्रैर्विमृदितं तृणम्॥ **2.88.13** ॥

मन्ये साभरणा सुप्ता सीतास्मिञ्शयने शुभा।
तत्र तत्र हि दृश्यन्ते सक्ताः कनकबिन्दवः॥ **2.88.14** ॥

उत्तरीयमिहासक्तं सुव्यक्तं सीतया तदा।
तथा ह्येते प्रकाशन्ते सक्ताः कौशेयतन्तवः॥ **2.88.15** ॥

मन्ये भर्तुः सुखा शय्या येन बाला तपस्विनी।
सुकुमारी सती दुःखं न विजानाति मैथिली॥ **2.88.16** ॥

हा हतोऽस्मि नृशंसोऽस्मि यत् सभार्यः कृते मम।
ईदृशीं राघवः शय्यामधिशेते ह्यनाथवत्॥ **2.88.17** ॥

सार्वभौमकुले जातः सर्वलोकसुखावहः।
सर्वप्रियकरस्त्यक्त्वा राज्यं प्रियमनुत्तमम्॥ **2.88.18** ॥

कथमिन्दीवरश्यामो रक्ताक्षः प्रियदर्शनः।
सुखभागी न दुःखार्हः शयितो भुवि राघवः॥ **2.88.19** ॥

धन्यः खलु महाभागो लक्ष्मणः शुभलक्षणः।
भ्रातरं विषमे काले यो राममनुवर्तते॥ **2.88.20** ॥

सिद्धार्था खलु वैदेही पतिं यानुगता वनम्।
वयं संशयिताः सर्वे हीनास्तेन महात्मना॥ **2.88.21** ॥

अकर्णधारा पृथिवी शून्येव प्रतिभाति मे।
गते दशरथे स्वर्गं रामे चारण्यमाश्रिते॥ **2.88.22** ॥

न च प्रार्थयते कश्चिन्मनसापि वसुन्धराम्।
वने निवसतस्तस्य बाहुवीर्याभिरक्षिताम्॥ **2.88.23** ॥

शून्यसंवरणारक्षामयन्त्रितहयद्विपाम्।
अनावृतपुरद्वारां राजधानीमरक्षिताम्॥ **2.88.24** ॥

अप्रहृष्टबलां शून्यां विषमस्थामनावृताम्।
शत्रवो नाभिमन्यन्ते भक्ष्यान् विषकृतानिव॥ **2.88.25** ॥

अद्यप्रभृति भूमौ तु शयिष्येऽहं तृणेषु वा।
फलमूलाशनो नित्यं जटाचीराणि धारयन्॥ **2.88.26** ॥

तस्याहमुत्तरं कालं निवत्स्यामि सुखं वने।
तत् प्रतिश्रुतमार्यस्य नैव मिथ्या भविष्यति॥ **2.88.27** ॥

वसन्तं भ्रातुरर्थाय शत्रुघ्नो मानुवत्स्यति।
लक्ष्मणेन सहायोध्यामार्यो मे पालयिष्यति॥ **2.88.28** ॥

अभिषेक्ष्यन्ति काकुत्स्थमयोध्यायां द्विजातयः।
अपि मे देवताः कुर्युरिमं सत्यं मनोरथम्॥ **2.88.29** ॥

प्रसाद्यमानः शिरसा मया स्वयं
बहुप्रकारं यदि न प्रपत्स्यते।
ततोऽनुवत्स्यामि चिराय राघवं
वनेचरं नार्हति मामुपेक्षितुम्॥ **2.88.30**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अयोध्याकाण्डे अष्टाशीतितमः सर्गः॥